शुक्ले बोधयामि त्वां यावत् पूजां करोम्यहम्।
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा॥”
इति मन्त्रलिङ्गम्॥
अकाल इति तु रात्रित्वेन दक्षिणायनस्य। तथा च श्रुतिः। तपस्तपस्यौ शैशिराव्रतुः मधुश्च माधवश्च वासन्तिकावृतुः शुक्रश्च शुचिश्च ग्रैष्मावृतुः। अथैतदुत्तरायणं देवानां दिनं नभाश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः सहाश्च सहस्यश्च हैमन्तिकावृतुः। अथैतद्दक्षिणायनं देवानां रात्रिरिति। एवञ्च। रात्रावेव महामाया ब्रह्मणा बोधिता पुरा। तथैव च नराः कुर्युः प्रतिसम्वत्सरं शुभेप्सितम्॥ अतएव लिङ्गपुराणकालिकापुराणयोर्द्दिवेत्युक्तम्। एवञ्च कालिकापुराणे बोधने रात्राविति पदं दैवतारात्रिपरम्। ततश्च पूर्व्वाह्णे नवम्यामार्द्रायुक्तायां बोधनं पूर्व्वाह्णेतरकाल एव आर्द्रालाभे दिवेत्यत्र दिवापदात्तत्रापि बोधनं अन्यथा दिवापदं व्यर्थं स्यात्। ज्योतिषार्णवे अक्तमुक्तं वराहेण।
“कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः।
तत्र बोधः प्रकर्त्तव्यो देव्या रात्रौ शुभप्रदः॥”
शिव आर्द्रा। एवञ्चोभयदिने पूर्व्वाह्णे नवमीलाभे परत्राद्रालाभे परत्र बोधनं न तु युग्मात् पूर्व्वत्र। युग्मबाधकपूर्व्वाह्णस्य बाधकनक्षत्रानुरोधात् दिवा नक्षत्रालाभे तु पूर्व्वाह्ण एव नवम्यां उभयत्र पूर्व्वाह्णलाभे पूर्व्वदिन एव युग्मात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणफलत्वाच्च।
“माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी।
माकरीति च यत्प्रोक्तं तत्प्रायोऽवृत्तिदर्शनात्॥”
इति॥
सौरागमात् माकर्य्यादिवत् आर्द्रायोग इत्यस्य प्रायिकत्वेनाभिधानं प्रतीयते। ततश्चाद्रारहितबोधने मन्त्रान्तरानुपदेशात् तन्मन्त्रः प्रणवयुक्तत्वेन प्रयुज्यते।
“यन्न्यूनञ्चातिरिक्तञ्च यच्छिद्रं यदयज्ञियम्।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वञ्चाविकलं भवेत्॥”
इति योगियाज्ञवल्क्यात् षष्ठ्यां बोधनेऽप्येवम्॥ नवमीबोधनासामर्थ्ये तु षष्ठ्यां सायं बोधनम्। तथा भविष्ये।
“षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु
कारयेत्॥”
सन्ध्योक्ता वराहेण।
“अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका
यावत्॥”
षष्ठ्यां बोधने तु प्रागुक्त ऐं रावणस्य वधार्थायेति अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यत इति पठेत्। यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभः तदा पूर्व्वेद्युर्बोधनं परदिने सायमामन्त्रणम्। यदा तूभयदिने सायं षष्ठ्यलाभस्तदा परेऽहनि पूर्व्वाह्णे षष्ठ्यां बोधनम्।
“बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च।
षष्ठ्यां बोधने तु न मन्त्रानुपदेशान्न तदादरः॥”
इति तिथ्यादितत्त्वम्॥

बोधनी, स्त्री, (बुध्+भावे ल्युट्। ङीष्। बोधः। (बोध्यतेऽनया। बुध्+णिच्+करणे ल्युट्। अनया हि मूर्च्छितो बोध्यते अतोऽस्य तथात्वम्।) पिप्पली। इति मेदिनी॥ (बुध्यतेऽस्याम्। बुध्+अधिकरणे ल्युट्। स्त्रियां ङीप्। अस्यां हि योगनिद्राया हरेः प्रबोधनात्तथात्वम्।) कार्त्तिकशुक्लैकादशी। सा तु उत्थानैकादशी। यथा,—
“शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन॥”
इति तिथ्यादितत्त्वम्॥
अपि च।
“तावद्गर्ज्जन्ति तीर्थानि वाजिमेधादयो मखाः।
मथुरायां प्रिया विष्णोर्यावन्नायाति बोधनी॥”
इति हरिभक्तिविलासे पद्मपुराणवचनम्॥

बोधनीयः, त्रि, (बुध्+कर्म्मणि अनीयर्।) बोध्यः। बोधितव्यः। बोधयोग्यः॥

बोधवासरः, पुं, (बोधस्य भगवतो मायानिद्रायाः प्रबोधस्य वासरः।) भगवतः प्रबोधदिनम्। उत्थानैकादशी। यथा,—
“जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि।
वृथा भवति तत् सर्व्वं न कृत्वा बोधवासरम्॥”
इति हरिभक्तिविलासधृतस्कन्दपुराणवचनम्॥

बोधानः, पुं, (बुध्यते इति। बुध्+आनच्।) गीष्पतिः। विज्ञः। बुधभेदः। इति शब्दरत्नावली॥

बोधिः, पुं, (बुध+“सर्व्वधातुभ्य इन्।”४।११७। इति इन्।) समाधिभेदः। पिप्पलवृक्षः। इति मेदिनी। धि, ११॥ (यथास्य पर्य्यायः।
“पिप्पलो बोधिरश्वत्थश्चैत्यवृक्षो गजाशनः॥”
इति वैद्यकरत्नमालायाम्॥)
बोधः। इति त्रिकाण्डशेषः॥ ज्ञातरि, त्रि। इत्युणादिकोषः॥

बोधितं, त्रि, (बुध्+णिच्+क्त।) ज्ञापितम्। यथा,—
“रात्रावेव महामाया ब्रह्मणा बोधिता पुरा॥”
इति तिथ्यादितत्त्वम्॥

बोधितरुः, पुं, (बोधिरेव तरुः।) अश्वत्थवृक्षः। इति हेमचन्द्रः। ४। १६७॥ (गुणादयोऽस्याश्वत्थशब्दे ज्ञातव्याः॥)

बोधितव्यं, त्रि, (बुध+णिच्+तव्य।) ज्ञापितव्यम्। यथा। बोधितव्योऽयं पूर्व्वपक्षः। इति शाङ्करभाष्यम्॥

बोधिद्रुमः, पुं, (बोधिरेव द्रुमः।) अश्वत्थवृक्षः। इत्यमरः। २। ४। २०॥

बोधिवृक्षः, पुं, (बोधिरेव वृक्षः।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

बोधिसत्त्वं, स्त्री, (बोधि बोधवत् सत्त्वम्।) बुद्धविशेषः। इति हेमचन्द्रः। २। १४६॥ (यथा, कथासरित्सागरे। २२। ३५।
“दयालुर्बोधिसत्त्वांशः कोऽन्यो जीमूतवाहनात्।
शक्नुयाद्दर्शयात् कर्त्तुमपि कल्पद्रुमं कृती॥”)

बौद्धं, स्त्री, (बुद्धेन प्रणीतम्। बुद्ध+अण्।) बुद्धकृतनिरीश्वरशास्त्रम्। तत् सर्व्वैः शास्त्रकारैः खण्डितं अग्राह्यम्। इति श्रीभागवतम्। बौद्धशास्त्रसंस्थापनकर्त्ता वृहस्पतिः। यथा,—
“प्राह वाचस्पतिं देवः पीड़ितोऽस्मि रजेः सुतैः।
न यज्ञभागो राज्यं मे निर्जितश्च वृहस्पते!।
राज्यलाभाय मे यत्नं विधत्स्व धिषणाधिप!॥
ततो वृहस्पतिः शक्रमकरोद्बलदर्पितम्।
ग्रहशान्तिविधानेन पौष्टिकेन च कर्म्मणा॥
गत्वाथ मोहयामास राजपुत्त्रान् वृहस्पतिः।
जिनधर्म्मं समास्थाय वेदबाह्यं स वेदवित्॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः।
वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान्॥”
इति मात्स्ये २४ अध्यायः॥
(बौद्धदर्शनं यथा, सर्व्वदर्शनसंग्रहे। “अत्र बौद्धैरभिधीयते यदभ्यधायि अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्। तदुक्तम्,
“कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्तरदर्शनात्॥”
इति॥
अन्वयव्यतिरेकाववविनाभावनिश्चायकाविति पक्षे साध्यसाधनयोर्व्यभिचारो दुरवधारणो भवेत् भूते भविष्यति वर्त्तमाने अनुपलभ्यमानेऽपि व्यभिचारशङ्काया अनिवारणात्। ननु तथाविधस्थले तावकेऽपि मते व्यभिचारशङ्का दुष्परिहरेति चेत् मैवं वोचः विनापि कारणं कार्य्यमुत्पद्यतामित्येवंविधायाः शङ्काया व्याघातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तं व्याघातावधिराशङ्केति। तस्मात्तदुत्पत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भपञ्चकनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनुपलम्भः कारणोपलम्भे सत्युपलम्भः उपलब्धस्य पश्चात् कारणानुपलम्भादनुपलम्भ इति पञ्चकारण्या धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते तथा तादात्म्यनिश्चयेनाप्यविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तेः अप्रवृत्ते तु बाधके भूयः सहभावोपलम्भेऽपि व्यभिचारशङ्कायाः को निवारयिता। शिंशपावृक्षयोश्च तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते। न ह्यत्यन्ताभेदे तत् सम्भवति पर्य्यायत्वेन युगपदपि प्रयोगायोगात् नाप्यत्यन्तभेदे गवाश्वयोरनुपलम्भात्। तस्मात्